श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ भजगोविन्दम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ भजगोविन्दम् ॥

भज गोविन्दं भज गोविन्दं
    गोविन्दं भज मूढमते।
संप्राप्ते सन्निहिते काले
    न हि न हि रक्षति डुकृञ्करणे ॥ 1 ॥

मूढ जहीहि धनागमतृष्णां
    कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोपात्तं
    वित्तं तेन विनोदय चित्तम् ॥ 2 ॥

नारीस्तनभर नाभीदेशं
    दृष्ट्वा मागामोहावेशम्।
एतन्मांसावसादि विकारं
    मनसि विचिन्तय वारं वारम् ॥ 3 ॥

नलिनीदलगत जलमतितरलं
    तद्वज्जीवितमतिशयचपलम्।
विद्धि व्याध्यभिमानग्रस्तं
    लोकं शोकहतं च समस्तम् ॥ 4 ॥

यावद्वित्तोपार्जन सक्तः
    तावन्निज परिवारो रक्तः।
पश्चाज्जीवति जर्जर देहे
    वार्तां कोऽपि न पृच्छति गेहे ॥ 5 ॥

यावत्पवनो निवसति देहे
    तावत्पृच्छति कुशलं गेहे।
गतवति वायौ देहापाये
    भार्या बिभ्यति तस्मिन्काये॥ **6** ॥

बालस्तावत्क्रीडासक्तः
    तरुणस्तावत्तरुणीसक्तः।
वृद्धस्तावच्चिन्तासक्तः
    परमे ब्रह्मणि कोऽपि न सक्तः॥ **7** ॥

का ते कान्ता कस्ते पुत्रः
    संसारोऽयमतीव विचित्रः।
कस्य त्वं कः कुत आयातः
    तत्त्वं चिन्तय तदिह भ्रातः॥ **8** ॥

सत्सङ्गत्वे निस्सङ्गत्वं
    निस्सङ्गत्वे निर्मोहत्वम्।
निर्मोहत्वे निश्चलतत्वं
    निश्चलतत्वे जीवन्मुक्तिः॥ **9** ॥

वयसि गते कः कामविकारः
    शुष्के नीरे कः कासारः।
क्षीणे वित्ते कः परिवारः
    ज्ञाते तत्त्वे कः संसारः॥ **10** ॥

मा कुरु धन जन यौवन गर्वं
    हरति निमेषात्कालः सर्वम्।
मायामयमिदमखिलं बुध्वा
    ब्रह्मपदं त्वं प्रविश विदित्वा॥ **11** ॥

दिनयामिन्यौ सायं प्रातः
    शिशिरवसन्तौ पुनरायातः।
कालः क्रीडति गच्छत्यायुः
    तदपि न मुञ्चत्याशावायुः॥ 12 ॥

का ते कान्ता धनगतचिन्ता
    वातुल किं तव नास्ति नियन्ता।
त्रिजगति सज्जनसङ्गतिरेका
    भवति भवार्णवतरणे नौका॥ 13 ॥

जटिलो मुण्डी लुञ्छितकेशः
    काषायाम्बरबहुकृतवेषः।
पश्यन्नपि च न पश्यति मूढो
    ह्युदरनिमित्तं बहुकृतवेषः॥ 14 ॥

अङ्गं गलितं पलितं मुण्डं
    दशनविहीनं जातं तुण्डम्।
वृद्धो याति गृहीत्वा दण्डं
    तदपि न मुञ्चत्याशापिण्डम्॥ 15 ॥

अग्रे वह्निः पृष्ठे भानु
    रात्रौ चुबुकसमर्पितजानुः।
करतलभिक्षस्तरुतलवासः
    तदपि न मुञ्चत्याशापाशः॥ 16 ॥

कुरुते गङ्गासागरगमनं
    व्रतपरिपालनमथवा दानम्।
ज्ञानविहीनः सर्वमतेन
    मुक्तिं न भजति जन्मशतेन॥ 17 ॥

सुर मन्दिर तरु मूल निवासः
शय्या भूतलमजिनं वासः।
सर्व परिग्रह भोग त्यागः
कस्य सुखं न करोति विरागः॥ **18** ॥

योगरतो वा भोगरतो वा
सङ्गरतो वा सङ्गविहीनः।
यस्य ब्रह्मणि रमते चित्तं
नन्दति नन्दति नन्दत्येव॥ **19** ॥

भगवद् गीता किञ्चिदधीता
गङ्गा जललव कणिकापीता।
सकृदपि येन मुरारि समर्चा
क्रियते तस्य यमेन न चर्चा॥ **20** ॥

पुनरपि जननं पुनरपि मरणं
पुनरपि जननी जठरे शयनम्।
इह संसारे बहुदुस्तारे
कृपयाऽपारे पाहि मुरारे॥ **21** ॥

रथ्या चर्पट विरचित कन्थः
पुण्यापुण्य विवर्जित पन्थः।
योगी योगनियोजित चित्तो
रमते बालोन्मत्तवदेव॥ **22** ॥

कस्त्वं कोऽहं कुत आयातः
का मे जननी को मे तातः।
इति परिभावय सर्वमसारं
विश्वं त्यक्त्वा स्वप्न विचारम्॥ **23** ॥

त्वयि मयि चान्यत्रैको विष्णुः
    व्यर्थं कुप्यसि मय्यसहिष्णुः।
भव समचित्तः सर्वत्र त्वं
    वाञ्छस्यचिराद्यदि विष्णुत्वम्॥ 24॥

शत्रौ मित्रे पुत्रे बन्धौ
    मा कुरु यत्नं विग्रहसन्धौ।
सर्वस्मिन्नपि पश्यात्मानं
    सर्वत्रोत्सृज भेदाज्ञानम्॥ 25॥

कामं क्रोधं लोभं मोहं
    त्यक्त्वाऽऽत्मानं भावय कोऽहम्।
आत्मज्ञान विहीना मूढाः
    ते पच्यन्ते नरकनिगूढाः॥ 26॥

गेयं गीता नाम सहस्रं
    ध्येयं श्रीपति रूपमजस्रम्।
नेयं सज्जन सङ्गे चित्तं
    देयं दीनजनाय च वित्तम्॥ 27॥

सुखतः क्रियते रामाभोगः
    पश्चाद्धन्त शरीरे रोगः।
यद्यपि लोके मरणं शरणं
    तदपि न मुञ्चति पापाचरणम्॥ 28॥

अर्थमनर्थं भावय नित्यं
    नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धन भाजां भीतिः
    सर्वत्रैषा विहिता रीतिः॥ 29॥

प्राणायामं प्रत्याहारं
    नित्यानित्य विवेकविचारम्।
जाप्यसमेत समाधिविधानं
    कुर्ववधानं महदवधानम्॥ **30**॥

गुरुचरणाम्बुज निर्भर भक्तः
    संसारादचिराद्भव मुक्तः।
सेन्द्रियमानस नियमादेवं
    द्रक्ष्यसि निज हृदयस्थं देवम्॥ **31**॥

॥ इति भजगोविन्दं समाप्तम्॥